# Yoga Sutra - Level 1 - Chapter 2

Int अथ द्वितीयः पादः।
atha dvitīyaḥ pādaḥ।

साधन-पादः।
sādhana-pādaḥ।

1 तपः-स्व-अध्याय-ईश्वर-प्रणिधानानि क्रिया-योगः।
tapaḥ-sva-adhyāya-īśvara-praṇidhānāni kriyā-yogaḥ।

2 समाधि-भावना-अर्थः क्लेश-तनू-करण-अर्थः च।
samādhi-bhāvanā-arthaḥ kleśa-tanū-karaṇa-arthaḥ ca।

3 अविद्या-अस्मिता-राग-द्वेष-अभिनिवेशाः क्लेशाः।
avidyā-asmitā-rāga-dveṣa-abhiniveśāḥ kleśāḥ।

4 अविद्या क्षेत्रम् उत्तरेषां प्रसुप्त-तनु-विच्छिन्न-उदाराणाम्।
avidyā kṣetram uttareṣāṃ prasupta-tanu-vicchinna-udārāṇām।

5 अनित्य-अशुचि-दुःख-अनात्मसु नित्य-शुचि-सुख-आत्म-ख्यातिः अविद्या।
anitya-aśuci-duḥkha-anātmasu nitya-śuci-sukha-ātma-khyātiḥ avidyā।

6 दृक् दर्शन-शक्त्योः एक-आत्मता-इव-अस्मिता।
dṛk darśana-śaktyoḥ eka-ātmatā-iva-asmitā।

7 सुख-अनुशयी रागः।
sukha-anuśayī rāgaḥ।

8 दुःख-अनुशयी द्वेषः।
duḥkha-anuśayī dveṣaḥ।

9 स्व-रस-वाही विदुषः अपि तथा आरूढः अभिनिवेशः।
sva-rasa-vāhī viduṣaḥ api tathā ārūḍhaḥ abhiniveśaḥ।

10 ते प्रतिप्रसव-हेयाः सूक्ष्माः।
te pratiprasava-heyāḥ sūkṣmāḥ।

11 ध्यान-हेयाः तत् वृत्तयः।
dhyāna-heyāḥ tat vṛttayaḥ।

12 क्लेश-मूलः कर्म-आशयः दृष्ट-अदृष्ट-जन्म-वेदनीयः।
kleśa-mūlaḥ karma-āśayaḥ dṛṣṭa-adṛṣṭa-janma-vedanīyaḥ।

13 सति मूले तत् विपाकः जाति-आयुः-भोगाः।
sati mūle tat vipākaḥ jāti-āyuḥ-bhogāḥ।

14 ते ह्लाद-परिताप-फलाः पुण्य-अपुण्य-हेतुत्वात्।
te hlāda-paritāpa-phalāḥ puṇya-apuṇya-hetutvāt।

15 परिणाम-ताप-संस्कार-दुःखैः गुण-वृत्ति-विरोधात् च दुःखम् एव सर्वं विवेकिनः।
pariṇāma-tāpa-saṃskāra-duḥkhaiḥ guṇa-vṛtti-virodhāt ca duḥkham eva sarvaṃ vivekinaḥ।

16 हेयं दुःखम् अनागतम्।
heyaṃ duḥkham anāgatam।

17 द्रष्टृ-दृश्ययोः संयोगः हेय-हेतुः।
draṣṭṛ-dṛśyayoḥ saṃyogaḥ heya-hetuḥ।

18 प्रकाश-क्रिया-स्थिति-शीलं भूत-इन्द्रिय-आत्मकं भोग-अपवर्ग-अर्थं दृश्यम्।
prakāśa-kriyā-sthiti-śīlaṃ bhūta-indriya-ātmakaṃ bhoga-apavarga-arthaṃ dṛśyam।

19 विशेष-अविशेष-लिङ्ग-मात्र-अलिङ्गानि गुण-पर्वाणि।
viśeṣa-aviśeṣa-liṅga-mātra-aliṅgāni guṇa-parvāṇi।

20 द्रष्टा दृशि-मात्रः शुद्धः अपि प्रत्यय-अनुपश्यः।
draṣṭā dṛśi-mātraḥ śuddhaḥ api pratyaya-anupaśyaḥ।

21 तत् अर्थः एव दृश्यस्य आत्मा।
tat arthaḥ eva dṛśyasya ātmā।

22 कृत-अर्थं प्रति नष्टम् अपि अनष्टं तत् अन्य-साधारणत्वात्।
kṛta-arthaṃ prati naṣṭam api anaṣṭaṃ tat anya-sādhāraṇatvāt।

23 स्व-स्वामि-शक्त्योः स्वरूप-उपलब्धि-हेतुः संयोगः।
sva-svāmi-śaktyoḥ svarūpa-upalabdhi-hetuḥ saṃyogaḥ।

24 तस्य हेतुः अविद्या।
tasya hetuḥ avidyā।

25 तत्-अभावात् संयोग-अभावः हानं तत्-दृशेः कैवल्यम्।
tat-abhāvāt saṃyoga-abhāvaḥ hānaṃ tat-dṛśeḥ kaivalyam।

26 विवेक-ख्यातिः अविप्लवा हान-उपायः।
viveka-khyātiḥ aviplavā hāna-upāyaḥ।

27 तस्य सप्तधा प्रान्त-भूमिः प्रज्ञा।
tasya saptadhā prānta-bhūmiḥ prajñā।

28 योग-अङ्ग-अनुष्ठानात् अशुद्धि-क्षये ज्ञान-दीप्तिः आविवेक-ख्यातेः।
yoga-aṅga-anuṣṭhānāt aśuddhi-kṣaye jñāna-dīptiḥ āviveka-khyāteḥ।

29 यम-नियम आसन-प्राण-आयाम-प्रत्याहार-धारणा-ध्यान-समाधयः अष्टौ अङ्गानि।
yama-niyama āsana-prāṇa-āyāma-pratyāhāra-dhāraṇā-dhyāna-samādhayaḥ aṣṭau aṅgāni।

30 अहिंसा-सत्य-अस्तेय-ब्रह्मचर्य-अपरिग्रहाः यमाः।
ahiṃsā-satya-asteya-brahmacarya-aparigrahāḥ yamāḥ।

31 जाति-देश-काल-समय-अनवच्छिन्नाः सार्वभौमाः महाव्रतम्।
jāti-deśa-kāla-samaya-anavacchinnāḥ sārvabhaumāḥ mahāvratam।

32 शौच-सन्तोष-तपः-स्व-अध्याय-ईश्वर-प्रणिधानानि नियमाः।
śauca-santoṣa-tapaḥ-sva-adhyāya-īśvara-praṇidhānāni niyamāḥ।

33 वितर्क-बाधने प्रतिपक्ष-भावनम्।
vitarka-bādhane pratipakṣa-bhāvanam।

34 वितर्काः हिंसादयः कृत-कारित-अनुमोदिताः लोभ-क्रोध-मोह-पूर्वकाः मृदु-मध्य-अधिमात्राः दुःख-अज्ञान-अनन्त-फलाः इति प्रतिपक्ष-भावनम्।
vitarkāḥ hiṃsādayaḥ kṛta-kārita-anumoditāḥ lobha-krodha-moha-pūrvakāḥ mṛdu-madhya-adhimātrāḥ duḥkha-ajñāna-ananta-phalāḥ iti pratipakṣa-bhāvanam।

35 अहिंसा-प्रतिष्ठायां तत्-सन्निधौ वैर-त्यागः।
ahiṃsā-pratiṣṭhāyāṃ tat-sannidhau vaira-tyāgaḥ।

36 सत्य-प्रतिष्ठायां क्रिया-फल-आश्रयत्वम्।
satya-pratiṣṭhāyāṃ kriyā-phala-āśrayatvam।

37 अस्तेय-प्रतिष्ठायां सर्व-रत्न-उपस्थानम्।
asteya-pratiṣṭhāyāṃ sarva-ratna-upasthānam।

38 ब्रह्मचर्य-प्रतिष्ठायां वीर्य-लाभः।
brahmacarya-pratiṣṭhāyāṃ vīrya-lābhaḥ।

39 अपरिग्रह-स्थैर्ये जन्म-कथन्ता-सम्बोधः।
aparigraha-sthairye janma-kathantā-sambodhaḥ।

40 शौचात् स्वाङ्ग-जुगुप्सा परैः असंसर्गः।
śaucāt svāṅga-jugupsā paraiḥ asaṃsargaḥ।

41 सत्त्व-शुद्धि-सौमनस्य एकाग्र्य-इन्द्रिय-जय-आत्म-दर्शन-योग्यत्वानि च।
sattva-śuddhi-saumanasya ekāgrya-indriya-jaya-ātma-darśana-yogyatvāni ca।

42 सन्तोषात् अनुत्तम-सुख-लाभः।
santoṣāt anuttama-sukha-lābhaḥ।

43 काय-इन्द्रिय-सिद्धिः अशुद्धि-क्षयात् तपसः।
kāya-indriya-siddhiḥ aśuddhi-kṣayāt tapasaḥ।

44 स्व-अध्यायात् इष्ट-देवता-सम्प्रयोगः।
sva-adhyāyāt iṣṭa-devatā-samprayogaḥ।

45 समाधि-सिद्धिः ईश्वर-प्रणिधानात्।
samādhi-siddhiḥ īśvara-praṇidhānāt।

46 स्थिर-सुखम् आसनम्।
sthira-sukham āsanam।

47 प्रयत्न-शैथिल्य-अनन्त-समापत्तिभ्याम्।
prayatna-śaithilya-ananta-samāpattibhyām।

48 ततः द्वन्द्व-अनभिघातः।
tataḥ dvandva-anabhighātaḥ।

49 तस्मिन् सति श्वास-प्रश्वासयोः गति-विच्छेदः प्राण-आयामः।
tasmin sati śvāsa-praśvāsayoḥ gati-vicchedaḥ prāṇa-āyāmaḥ।

50 सः तु बाह्य-आभ्यन्तर-स्तम्भ-वृत्तिः देश-काल-सङ्ख्याभिः परिदृष्टः दीर्घ-सूक्ष्मः।
saḥ tu bāhya-ābhyantara-stambha-vṛttiḥ deśa-kāla-saṅkhyābhiḥ paridṛṣṭaḥ dīrgha-sūkṣmaḥ।

51 बाह्य-आभ्यन्तर-विषय-आक्षेपी चतुर्थः।
bāhya-ābhyantara-viṣaya-ākṣepī caturthaḥ।

52 ततः क्षीयते प्रकाश-आवरणम्।
tataḥ kṣīyate prakāśa-āvaraṇam।

53 धारणासु च योग्यता मनसः।
dhāraṇāsu ca yogyatā manasaḥ।

54 स्व-विषय-असम्प्रयोगे चित्त-स्वरूप-अनुकारः इव इन्द्रियाणां प्रत्याहारः।
sva-viṣaya-asamprayoge citta-svarūpa-anukāraḥ iva indriyāṇāṃ pratyāhāraḥ।

55 ततः परमा वश्यता इन्द्रियाणाम्।
tataḥ paramā vaśyatā indriyāṇām।

Closing

इति पतञ्जलि-विरचिते योग-सूत्रे द्वितीयः साधन-पादः।
iti patañjali-viracite yoga-sūtre dvitīyaḥ sādhana-pādaḥ।